# विषय—प्रवेशः

संस्कृत—गद्य—काव्यपरम्परायां पं. अम्बिकादत्त—व्यास—विरचितं 'शिवराज— विजय' इत्यभिधमुपन्यासात्मकं गद्यकाव्यमस्ति। यत्र शौर्यरसिकस्य स्वातंत्र्यवीरस्य महाराष्ट्रकेशरिणः शिववीरस्य उदात्तं चरितमोजस्विन्यां गीर्वाणवाण्यां चित्रितं विद्यते। संस्कृतगद्यकारेषु सुबन्धुः दण्डी बाणभट्टश्चेति त्रयो गद्यकारा विशेषतः स्मर्यन्ते; स्वनामधन्यस्तत्रभवान् पण्डितवर्यः अम्बिकादत्तव्यासोऽपि तामेव पुरातनीं परम्परामनुसरन्नपि कामपि नूतनतां बिभर्ति। अत एवाधुनिकाः समीक्षकाः सादरमेनम् 'अभिनवबाणोऽय' मिति सम्बोधयन्ति। काव्यमिदं स्वीयया सहजया नानाविधशा— ब्दिकप्रयोगप्रचुरया प्रभावपूर्णया च भाषया किमपि सातिशयं वैशिष्ट्यं भजते।

## श्रीमदम्बिकादत्तव्यासस्य जीवनपरिचयः

पण्डितवर्यस्याम्बिकादत्तव्यासस्य स्थितिकालः 1858 ईसवीयाब्दतः 1900 ईसवीयाब्दपर्यन्तं यावद् मन्यते। एतदीयाः पूर्वजाः जयपुर—राज्यनिवासिन आसन्; परमस्य पितामहो राजारामः काशीमुपेत्य तत्रैव वसतिं चकार। तस्य द्वौ पुत्रौ आस्ताम्—दुर्गादत्तो देवीदत्तश्च। तत्र दुर्गादत्तस्य द्वितीयः पुत्रोऽम्बिकादत्तव्यासः आसीत्। व्यासमहोदयो बाल्यादेव प्रतिभासम्पन्न आसीत्। प्राप्ते दशमे वर्षेऽयं काव्यरचनामारभत। भारतेन्दुहरिश्चन्द्रः काशीकवितावर्द्धिनीसभामाध्यमेन कवित्वप्रतिभाशालिनमेनं 'सुकवि' रित्युपाधिना समबोधयत्।

एतदीयं पारिवारिकं जीवनं नाधिकं सुखमयमासीत्, बालविवाहप्रथया त्रयोदशवर्षदेशीयस्यास्य विवाहो जातः। अस्य पिता दुर्गादत्तः पौरोहित्येन जीविकोपार्जनं विदधाति स्म; अत आर्थिकविपन्नतया परिवारपालनं यथा तथैव भवति स्म। अन्यच्च यदाऽयमेकादशवर्षदेशीय आसीत्तदाऽस्य जननी दिवमगात् यदा चायं सप्तदशवर्षदेशीयोऽभूत्तदाऽस्य जनकोऽपि दिवमगात्। एवञ्च बहुविधं कष्टजातं सहमानोऽयं 1937 तमे वैक्रमाब्दे काशीस्थ गवर्नमेन्ट संस्कृतकालेजतः साहित्याचार्यपरीक्षामुदतरत्। अन्यच्च वक्तृत्वे शास्त्रार्थे कविता रचनायाञ्चा— तितरां कौशलमवाप्नोत्। काव्यरचनायां तु तथा कौशलमधिगतं यदयमेकस्यामेव घटिकायां शतं श्लोकान् रचयितुं प्रभवति स्म। अत एव 1938 तमे वैक्रमाब्दे भवान् काशी ब्रह्मामृतवर्षिणीसभायां 'घटिकाशतक इत्युपाधिना विभूषितोऽभूत्। 1940 तमे वैक्रमाब्दे भवान् मधुवनी संस्कृत पाठशालायाः प्रधानाचार्यत्वेन अध्यापनमारभत। ततश्च 1943 तमे वैक्रमाब्दे मुजफ्फरपुरे मण्डलस्तरीये विद्यालये प्रधानपण्डितरूपेण भवान् अगच्छत्; ततश्च 1944 तमे वैकमाब्दे भवान् भागलपुर— मण्डलविद्यालये प्रधानपण्डितोऽभूत्। संपेक्षण बिहारराज्यमस्य कर्मभूमिरासित्। कथ्यते 1950 तमे वैकमाब्दे भवान् अवकाशं गृहीत्वा भारतभ्रमणाय अगच्छत्। अशेषदेशे तत्समादरोऽभूत्। कथ्यते यदयं शतं प्रश्नान् श्रुत्वा तान् तेनैव क्रमेण समाधातुं क्षमते स्म। अत एवायं 'शतावधान' इत्युपाधिना समादृतोऽभूत्। विलक्षण— मेधासम्पन्नोऽयं महाकविः अल्पीयस्येव वयसि 1957 तमे वैक्रमाब्दे शिवसायुज्यमवाप्नोत्। पुनरपि यशः शरीरेण अद्यापि जीवति।

**रचनापरिचय :—** श्रीमदम्बिकादत्तव्यासेन विरचितानां ग्रन्थानां संख्या भूयसी वर्तते। तेषु मुख्यतमाः इमाः रचनाः सन्ति (1) गणेशशतकम् (2) कथाकुसुमम् (3) सांख्यसागरसुधा (4) पातञ्जलप्रतिबिम्बम् (5) दुःखद्रुमकुठारः, (6) अवतारमीमांसाकारिका (7) प्राकृतगूढशब्दकोषः (8) संस्कृताभ्यासपुस्तकम् (9) कथाकुसुमम् (10) शिवराज—विजयः (उपन्यासः) (11) सामवतम् (नाटकम्) चेति। परमासु रचनासु महाराष्ट्रकेसरिणः शिवराजस्य ओजस्विचरितमादाय विरचितं शिवराजविजयाख्यं काव्यं विद्वत्सु अधिकं समाद्रियते।

## शिवराजविजयस्य कथासारः

शिवराजस्य कथावस्तु त्रिषु विरामेषु विभक्तं वर्तते; प्रत्येकं विरामश्च चतुर्षु निःश्वासेषु विभक्तो

विद्यते। तच्च कथावस्तु संक्षेपेण एवं वर्णयितुं शक्यते–

दक्षिणभारते यवनानामाधिपत्येन अत्याचारैश्च खिन्नः शिववीरः स्वतन्त्रतायै संघर्षमारभते। कूटनीतिपटुरयं प्रतिगव्यूति आश्रमान् समस्थापयत्; तेन चायं यवनानां योजनाः जानाति स्म। शिववीरस्य विजयाभियानेन खिन्नो बीजापुरनरेशः तेन सह योद्धुं ससेनम् अपजलखानं प्रैषयत्। तदानीं शिववीरः प्रतापदुर्गे निवसन् आसीत्। अपजलखानः भीमानद्यास्तटे स्वशिविरमस्थापयत्। बीजापुरनरेशः सन्धिव्याजेन शिववीरं जीवन्तं ग्रहीतुमिच्छति स्मः, अतः स स्वीयां योजनां पत्रे विलिख्य एकं यवनगुप्तचरम् अपजलखानस्य सविधे प्रैषयत्, स च मध्येमार्गमेकां विप्रकन्यामपाहरत्; परं संयोगात् सा ब्रह्मचारिगुरोः शिष्याभ्यां गौरसिंह–श्यामसिंहाभ्यां रक्षिता जायते; कन्यापहकारको यवनगुप्तचरश्च गौरसिंहेन हन्यते। हतस्य तस्य चरस्य वस्त्राणि अन्विष्य तत्पत्रं प्राप्नोत्। तस्मात् पत्राच्च 'बीजापुरनरेशः सन्धिव्याजेन मां छलयितुमिच्छति' इति विज्ञाय शिववीरः स्वयम् अपजलखानं छलयितुं योजनां व्यदधात्। पत्रेण तेन इदमपि ज्ञातमभूद् यदेतदर्थं गोपीनाथ– पण्डितः शिवस्य सकाशं प्रेष्यते' इति। तदनुसारं गोपीनाथः शिवराजं प्राप्नोति; बहुप्रकारेण शिवेन संलप्य प्रतापदुर्गाद् आरादेव असौ अपजलखान–शिववीरयोः सम्मेलनविषयिणीं व्यवस्थामकरोत्। अपरतः गौरसिंहोऽपि गायकवेषेण अपजलखानशिविरम् उपेत्य निखिलां तदीयां योजनां ज्ञात्वा शिवमुपैति। रात्रावेव शिवराजः स्वीयां सेनाम् अपजलखानशिविरस्य पश्चाद् भागे लतागुल्मेषु दुर्ग– प्राचीर व्यवधानेषु अन्यत्र च सन्नद्धां करोति स्म। प्रातः अपजलखानः शिवेन मिलितुमगच्छत्; अपरतः स्ववस्त्राणामधस्तात् कवचं हस्तयोश्च व्याघ्रनखनामकं शस्त्रं परिधाय अगच्छत्; मिथः आलिङ्गनावसर एव प्रगाढालिङ्गनमिषेण शिवः अपजलखानस्य अंसौ ग्रीवां च पाटयित्वा तं भुवि अपातयत्; पूर्वयोजनानुसारं तदीया सेना अपजलखानस्य ससामग्रीकानि शिविराणि दग्ध्वा अकस्मादेव आक्रमते; तेन बहवो हन्यन्ते, शेषाश्च पलायन्ते।

अपरतः गौरसिंहः यां विप्रकन्यामरक्षत्; तस्याः संरक्षकः कश्चन वृद्धः ब्राह्मणः आसीत्। समागतवति तस्मिन् रहस्यमिदं ज्ञायते यदियं कन्या गौरसिंह–श्यामसिंहयोः भगिनी सौवर्णी अस्ति; वृद्धोऽयं ब्राह्मणश्च तयोः पुरोहितः देवशर्मा अस्ति इति। ततश्च ब्रह्मचारिगुरोः अनुरोधेन गौरसिंहः स्ववृत्तं श्रावयन् कथयति यत् – ते (गौरसिंह–श्यामसिंहौ सौवर्णी च) उदयपुरराज्यस्य कस्यचन लघुक्षेत्रस्य प्रशासकस्य खड्गसिंहस्य तनुजाः सन्तिः दुर्दैवात् परलोकं गतवतोः पित्रोः ते त्रयोऽपि पुरोहितस्य देवशर्मणः संरक्षणे अवसन्। एकदा आखेटं क्रीडन्तौ उभावपि भ्रातरौ लुण्ठाकैः अपहृतौ अभूताम्; परमेकदा कञ्चित् पान्थसार्थं लुण्ठनाय गतेषु लुण्ठकेषु तौ बन्धनानि छित्वा शस्त्रैः सुसज्जीभूय तयोः रक्षणार्थं स्थितं प्रहरिणं भीषयित्वा च हयौ आरुह्य पलायनम्कुरुताम् सायं यावच्च सुदीर्घमध्वानमतीत्य तौ एकस्य लघुग्रामस्य समीपे विद्यमानं हनुमन्मन्दिरं प्राप्नुतः, मन्दिरपूजकः अतीव स्नेहेन तयोः भोजनविश्रामादिव्यवस्थां विदधाति; तस्य सहायतया च तौ महाराष्ट्रदेशं प्राप्नुतः, तत्र भीमानद्यास्तटे तयोः साक्षात्कारः शिवेन सह जायते; ततश्च तौ अस्मिन् आश्रमे निवासं प्रारब्धवन्तौ।

अपरतः शाइस्तखानः पूनानगरं वशीकृत्य तत्रैव शिवराजस्य प्रासादेषु निवासमारभत। अतः शिवराजस्य तेन सह युद्धमवश्यम्भावि अभूत्। शिववीरः सिंहदुर्गात् स्वीयमेकं सन्देशं रघुवीरसिंहमाध्यमेन तोरणदुर्गाध्यक्षाय प्रैषयत्। स च वातवर्षादिबाधाचक्रम् उपेक्ष्य तोरणदुर्गं प्राप्य दुर्गाध्यक्षाज्ञया हनुमन्मन्दिरे तिष्ठति स्म। मन्दिरवाटिकायां गीतं गायन्तीं सौवर्णीं वीक्ष्य रघुवीरसिंहस्य हृदये तां प्रति अनुरागो जायते। शिवराजाज्ञया रघुवीरसिंहः शाइस्तखानेन सह सम्पत्स्यमानस्य युद्धस्य भविष्यं प्रष्टुं देवशर्मणः सकाशं गतः आसीत्। देवशर्मा सौवर्ण्या तमेकं मोदकं भोजयित्वा तद्गले मालां परिधापयति; कथयति च प्रातरागत्य रात्रौ दृष्टं स्वप्नं श्रावय इति। प्रातः दुर्गाध्यक्षात् संदेशस्य उत्तरमादाय स देवशर्माणमुपैति तस्मात् च यवनैः सह युद्धे जयः आर्यैःसह युद्धे च पराजयः इति भविष्यफलं विज्ञाय वाटिकामुपैति। तत्र च पुनः सौवर्णीं पश्यति तदनुज्ञया च रत्नमालां तत्कण्ठे परिधापयति। ततश्च असौ भगवतः मारुतेः प्रसादं गृहीत्वा सिंह दुर्गं प्रातिष्ठत।

अपरतः शिववीरोऽपि पण्डितवेषेण माल्यश्रीकेण सह शाइस्तखान–निवासं पूनानगरमुपेत्य गुप्तरूपेण तत्रत्यं निरीक्षणं विधाय प्रत्यागच्छत् संदिह्य अनुगन्ता चाँदखानश्च तेन हन्यते स्म। ततश्च शाइस्तखानद्वारा पूनानगरे जनसमूहस्य प्रवेशनिषेधं विज्ञाय शिवः यशवन्तसिंहं पूनानगराद् दूरे अवस्थानाय प्रार्थयते स्वयञ्च वरयात्रामिषेण प्रमुखैः शूरसहचरैः, सह पूनानगरं प्राविशत् शाइस्तखाननिवासञ्चाक्रमत; तत्र च चाँदखानस्य शाइस्तखानस्य पुत्राः रघुवीरसिंहेन हन्यन्ते स्म स्वयं शाइस्तखानश्च आहतः सन् वातायनात् कूर्दनं विधाय अपलायत। अपरतः रघुवीरसिंहः अवरंगजीवस्य पुत्रीं रोशनआराम् बन्दिनीं व्यदधात्।

इतः एकदा ब्रह्मचारिगुरुः गौरसिंहाय स्वस्य स्वपुत्रस्य वीरेन्द्रसिंहस्य च पूर्वं वृतान्तम् अश्रावयत्। अपरतः रघुवीरसिंहे अनुरागिणी सौवर्णी क्रूरसिंहेन कृतं निजापमानं न्यवेदयत्। तदैव संयोगात् क्रूरसिंहस्य नियुक्तिरन्यत्र जायते तेन तदीया व्यथा शाम्यति। अपरतः बन्दिनी रोशनआरा शिवे निजानुरागं प्रकटयति परमसौ भवत्याः पिता ददाति चेत् स्वीकुर्याम्' इति अकथयत्। तदैव जयसिंहः ससेनः आक्रमते। शिववीरः तद्घृदये हिन्दुत्वभावनामुत्पादयितुं प्रायतत; परं विफलः सन् कारणवशात् यवनैः सह सन्धातुं विवशोऽभूत्। तदनुसारं रोशनआराम् मुअज्जमं च समर्पयत्।

ततश्च विजयपुरमाक्रम्य रघुवीरसिंह–सहायतया शिवः विजयमलभत रहमतखानञ्च जीवन्तं गृह्णति स्म। परं रहमतखान–क्रूरसिंहयोः 'रघुवीरसिंहः राजद्रोही अस्ति' इति कथने विश्वस्य शिववीरः रघुवीरसिंहं निष्कासयति स्म। कालान्तरे च ज्ञातमभूद् यद् राजद्रोही क्रूरसिंहः आसीत् इति।

अपमानितो रघुवीरसिंहः राधास्वामिवेषं धृत्वा शिववीरमुपकुरुते स्म; सौवर्ण्याः अपहरणेच्छुकं क्रूरसिंहञ्च हन्ति स्म। जयसिंहसन्धिमनुसृत्य शिववीरः 1966 तमे ईशाब्दे अवरंगजीवसभायां दिल्लीनगर्यामुपस्थितोऽभूत्। मध्येमार्गं राधास्वामी (रघुवीरसिंहः) बहुवारं तं तत्र गमनाय रोद्धुं चेष्टते स्म, परं शिवः नैव अमन्यत। सभायामुपस्थितेरनन्तरम् अवरंगजीवः शिवं कारागारे अबध्नात् बहिश्च रक्षिणः न्ययोजयत्। परं स्वस्य योजनया रघुवीरसिंहस्य च सहयोगेन शिवः स्वमित्रैः सार्धं पलायने सफलो भवति स्म। ततश्च राधास्वामी एव रघुवीरसिंहोऽस्ति इति विज्ञाय शिवस्तं क्षमां याचते।

ततः रघुवीरसिंहोऽपि शिवेन सह प्रत्यावर्तत; तस्मै मण्डलेश्वरपदं प्रायच्छत् सौवर्ण्या सह तस्य विवाहोऽजायत। शिवः विवाहे सम्मिल्य तमाशीर्भिः अयोजयत्। अपरतः दूताः असूचयन् यत् सन्धौ यवनेभ्यः प्रदत्ताः सर्वेऽपि दुर्गाः विजिताः सन्ति इति।

ततश्च शिववीरः सतारानगरीं राजधानीं विधाय तत्र निवासमारभत; शनैः शनैश्च सम्पूर्णमहाराष्ट्रे तदधिकारः संवृत्तः; अवरंगजीवेन प्रेषितः सेनापतिः मेहब्बतखानश्च पलायनाय विवशो भवति स्म। एवमितिवृत्तं यथाशक्यरूपेण रक्षता कविना सरसोऽयमुपन्यासः पाठकानां पुरस्तात् प्रस्तुतोऽस्ति।

## शिवराजविजयस्य काव्यगतं वैशिष्ट्यम्

पं. अम्बिकादत्तव्यासविरचितं 'शिवराजविजय' इत्याख्यातमेकमुपन्या– सात्मकमुत्कृष्टं गद्यकाव्यमस्ति; स्वातन्त्र्यैकवीरस्य 'छत्रपति' इत्युपाधि–विभूषितस्य शिवराजस्योदात्तं चरितमादाय निबद्धमेत्काव्यं पुरातनपरम्परामनुसरदपि कामपि नूतनतां बिभर्ति। कविवरो व्यासोऽत्र कथावस्तुसंयोजने तदनुकूलघटनानामुपन्यासे च यथा कौशलमावहति तथा भावानामभिव्यञ्जने तदनुकूलभाषासंयोजने चापि किमप्यपूर्वं वैशारद्यं धत्ते। सर्वत्रैव भावानां प्रस्तुतिः तुलिकयोन्मीलितं चित्रमिवाभाति। एतदीयं भाषासौष्ठवं वीक्ष्य प्रतीयते यद् वाग्देवता वश्यैवैनमनुवर्तते। यादृशाः भावाः तादृशा एव शब्दाः अहमहमिकया प्रस्तुताः दृश्यन्ते। चित्रायितानि वर्णनानि सद्य एव पाठकान् आनन्दमग्नान् विदधति। पठनकाले पाठकानामुत्कण्ठा प्रतिपदं तरुणायते।

एतदीयमिदं काव्यं कथावस्तु–घटनोपन्यास–वर्णनवैविध्य–प्रकृतिचित्रण–

पात्रचित्रण–संवादयोजना–रसालंकार–भाषासौष्ठवादिदृष्ट्या अतीव मनोहारि वर्तते। प्रथमन्तावत् –

**कथावस्तुयोजना–** शिवराजविजयः एकः ऐतिहासिकः उपन्यासः वर्तते; यत्र कविवरो व्यासः शिवराजविषयकः वृत्तमवलम्ब्य तस्मै उत्कृष्टं काव्यस्वरूपं प्रयच्छति। काव्येऽस्मिन् त्रयो विरामाः सन्ति; प्रत्येकं विरामे च चत्वारः निःश्वासाः सन्ति। एतदीया प्रधानकथा नायकं शिवराजमवलम्बते; यश्च नानासंघर्षान् सोढ्वा पर्यन्ते विजयं लभते। रघुवीरसिंहश्चात्र उपनायकोऽस्ति; यत्संबन्धिनी– कथासमान्तररूपेण चलति। गौरसिंह–श्यामसिंह–ब्रह्मचारिगुरु–देवशर्माद्याः नायकस्य सहायकाः सन्ति। अवरङ्गजीवश्च प्रतिनायकोऽस्ति; अपजलखान–शाईस्तखान– जयसिंहप्रभृतयश्च तस्य सहायकाः सन्ति। काव्येऽस्मिन् इतिहासेन सह कल्पनाया आदर्शेन सह यथार्थस्य च मनोहारी समन्वयो विद्यते। 'धर्मं न त्यजेज्जीवितस्यापि हेतोरित्यार्षं सिद्धान्तमक्षरशः पालयन् नायकोऽत्र आफलोदयं कर्म समाचरति।

**नामकरणम्–** शिवराजस्य विजयः शिवराजविजयः, तमधिकृत्य कृतं काव्यं शिवराजविजयमित्यभिधानं युक्ततरं प्रतिभाति; परं समीक्षकाः उपन्यासोऽय– मिति कृत्वा 'शिवराजविजयः' इति सम्बोधयन्ति; तेन च शिवराजमधिकृत्य कृतः उपन्यासः 'शिवराजविजय' इति सङ्गच्छते।

**घटनानामुपन्यास :–** काव्ये विविधघटनानां योजनायां कविः यावान् कुशलो भवति; तावदेव काव्यं हृदयावर्जकं भवति। ऐतिहासिकमपि वृत्तं कवि– र्व्यासस्तथा योजयति यथाऽत्र सर्वं रसमयं प्रतिभाति। एतदर्थं विविधघटनानां सम्यग्योजनं विदधाति। तथाहि शिवराजविजयस्य आदौ शिवराजस्य यवनैः सह संघर्षस्य औचित्यं संगमयन् योगिराजस्य प्रसङ्गमुपस्थापयति। तदनुसारं भूमिका– मवतारयन् कविः कथयति यत् यत्र भारते पुरा याज्ञिकाः राजसूयादीन् यज्ञान् अकुर्वन्; वर्षवातातपहिमसहानि तपांसि च अतपन् तत्रैव भारते अद्यत्वे म्लेच्छैः गावो हन्यन्ते वेदा विदीर्यन्ते, स्मृतयः संमृद्यन्ते, मन्दिराणि मन्दुरीक्रियन्ते, सत्यः पात्यन्ते, सन्तश्च सन्ताप्यन्ते। एवम्भूतां भारतवर्षीयां दुर्दशां दर्शं दर्शं खिन्नचेताः शिववीरस्तामपाकर्तुं 'कार्यं साधयेम देहं वा पातयेम' इति सिद्धान्तं चरित्रार्थयन् निजोद्योगमारभते, पर्यन्ते च विजयं लभते। एवमेव घटनान्तराणि संयोजितानि विद्यन्ते; येन पाठकानामुत्कण्ठा प्रतिपदं वर्धते।

**वर्णनानां वैविध्यम्–** 'सन्ध्या–सूर्येन्दु–रजनी–प्रदोषध्वान्तवासराः। .................वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह।' इत्यनुसारं कवयः प्रायेण विविधैः वर्णनैः स्वकीयं कथ्यं विस्तारयन्ति। शिवराजविजयेऽपि पं. अम्बिकादत्तव्यासः क्वचित् सूर्योदय–रजनी–चन्द्रोदय–सूर्यास्तादीनाम्, क्वचिद् यवनाक्रान्तभारतभुवः क्वचिद् ब्रह्मचारि–तद्गुरुयोगिराजादीनाम्, क्वचिद् राजपुत्रदेशस्य, क्वचिच्चित्र– दुर्गस्थकुलाङ्गनावर्गस्य, क्वचिद् बङ्गदेशस्य, क्वचिद् भीमानद्याः क्वचिद् अमृतोदा– ख्यमहासरसः, क्वचित् शिवशौर्य– सूचकस्य कोङ्कणदेशस्य, क्वचित् पर्वतश्रेणीनाम्, क्वचिज्झञ्झावातस्य, क्वचित्तेजस्विनः क्षत्रियकुमारस्य, क्वचित् कुलीनायाः सौवर्ण्याः, क्वचिद् यजमानसन्ततिपालकस्य पुरोहितस्य, क्वचिद् वेशपरिवर्तनपटोः गौरसिंहस्य, क्वचिद् वातवर्षादिकमतिक्रम्य स्वामिकार्यं साधयितुं तत्परस्य रघुवीरस्य, क्वचिद् यवनशिविराणां तत्सेनानायकस्य च वर्णनानि सन्ति। सर्वाण्येव वर्णनानि पाठकानां पुरस्ताच्चित्रवत् प्रस्तुतानि सन्ति। तथाहि – योगिराजं वर्णयन् आह – **'सुघटितं शरीरम्, सान्द्रां जटाम्, विशालान्यङ्गानि, अङ्गारप्रतिमे नयने, मधुरां गम्भीराञ्च– वाचम्............।**

यथा वा ब्रह्मचारिणं वर्णयन्नाह–**'बटुरसौ आकृत्या सुन्दरः, वर्णेन गौरः, जटाभिर्ब्रह्मचारी.......... ............. विशाललोचनश्चाऽऽसीत्।'**

**यथा वा–रघुवीरसिंह वर्णनावसरे – 'अतिमसृणकमलोदरकिसलयसोदरौ कपोलौ उन्नतमंसम्, दीर्घौ बाहू, माधुर्यवर्षिणी अक्षिणी, विनयभारेणेव विनतां कन्धराम्, तेजसेव गौरमङ्गम्, दाक्षिण्येनेवाङ्कितं ललाटम्, भद्रतयेव च स्नातम् शरीरम्।'**

यथा वा भीमानद्याः वर्णनावसरे – **"पुण्यनगरस्य समीपे एव प्रक्षालितगण्डशैलमण्डलायाः निर्झरवारिधारा**

**पूरपूरितप्रबलप्रवाहायाः ................ रिङ्ग तरङ्ग भङ्गोद्भूतावर्त्तशतभीमायाः भीमायाः नद्याः .............।"**

सायङ्कालं वर्णयन्नाह–**'मासोऽयमाषाढः अस्ति च सायं समयः, अस्तं जिगमिषुर्भगवान भास्करः सिन्दूरद्रवस्नातामिव वरूणदिगवलम्बिनाम– रुणवारिवाहानामभ्यन्तरं प्रविष्टः। कलविङ्का .........।"** एवमन्यत्।

**प्रकृति–चित्रणम्–**प्रकृतिः मानवस्य आद्या सहचरी विद्यते। संस्कृत– साहित्ये प्रकृतिचित्रणपरम्परा प्रारम्भत एवावलोक्यते। महाकविः अम्बिकादत्तव्यासः प्रकृतिनट्याः सुकुमारवर्णने अतितरां सफलोऽभूत्। तदनुसारं शिवराजविजये सूर्योदय–सूर्यास्त–चन्द्रोदयादीनां चित्रणमतीव रुचिरमस्ति। शिवराजविजयस्य आदौ उदेष्यन्तं भास्वन्तं वर्णयन् आह – 'एष भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचरचक्रस्य, ...... ............... उदेष्यन्तं भास्वन्तम् ................।'

एतदीयं सूर्यास्तवर्णनन्तु अतीव स्पृहणीयं वर्तते। तथाहि –

**जगतः प्रभाजालमाकृष्य, कमलानि संमुद्रय.....................चक्षुषामगोचर एव सञ्जातः।**

नीरवनिशायाः वर्णनं यथा – **धीरसमीरस्पर्शेन.................... चञ्चरीकेषु।"**

झञ्झावातवर्णनावसरे तु कवि एतावान् सफलोऽभूत् यत् पाठकानां चक्षुषोः पुरस्तात् प्रत्यक्षमिवाभाति – **'तावदकस्मादुत्थितो महान् झञ्झावात......।'** क्वचित् प्रकृतेः कठोररूपचित्रणेऽप्यतीव कुशलो दृश्यते। तथाहि – **'अथ भगवन्! श्रूयते सुदूरस्मात् स्थानात् कोङ्कणदेशः मध्ये च विकटा अटव्यः.............पदे पदे च भयानकभल्लूकानाम्बूकृतसङ्कलानाम्, मुस्तामूलोत्खननघुर्घुरायित–घोरघोणानां घोणिनाम्...................... विकटकरकटिकटविपाटन–पाटव–पूरितसंहनननानां सिंहानाम्...................।'** एवमुभयविधप्रकृत्याश्चित्रणेऽयमतीव कुशलोऽस्ति।

**पात्राणां चरित्रचित्रणम्–** 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरोजनः' इति शिवसंकल्पवतां महाकवीनां स्वाभाविकीयं प्रवृत्तिर्भवति; यत्ते स्वीये काव्ये उदात्तचरितानि पात्राणि संयोज्य लोकान् कृत्येषु प्रवर्तयन्ति। पं. अम्बिकादत्त– व्यासमहोदयोऽपि तामेव परम्परामनुसरति। शिवराजविजये प्रथमे विरामे नायकः शिवराजः तत्सहयोगिनो गौरसिंह–श्यामसिंह–ब्रह्मचारिगुरु–देवशर्माद्याश्च यवनसेनानायकोऽपजलखानश्चेति प्रमुखानि पात्राणि सन्ति। कविवरो व्यासः पात्राणां चरित्रचित्रणे सर्वत्र सहजतां किं वा यथार्थतामाश्रयते।

तत्र नायकः शिववीरः धीरोदात्तप्रकृतिको विद्यते; यश्च स्वधर्मरक्षणतत्परः राजनीतौ निष्णातः भारतीयादर्शानां पालकः संरक्षकश्चास्ति। यश्च स्वीयेन अखर्वेण शौर्येण पराक्रमेण सदाचारेण च सनातनधर्मं रक्षितुं तत्परोऽस्ति; तद्रक्षणाय च "कार्यं साधयेम देहं वा पातयेम" इति सिद्धान्तमनुसरति। तदुक्तं ब्रह्मचारिगुरुणा – "महाराष्ट्ररत्नम्.........भूषणं भटानां निधिर्नीतीनाम्......... प्रातः स्मरणीयः स्वधर्माऽऽग्रहग्रहग्रहितः शिव इव धृतावतारः शिववीरः.........।"

सोऽयं शिववीरः आकृत्या खर्वोऽपि दुर्धर्षपराक्रमः दृढसन्धिबन्धः विशालललाटः प्रचण्डबाहुदण्डः शोणापाङ्गः शरीरी पराक्रमः इवासीत्। तदुक्तं कविना – "खर्वाऽप्यखर्वपराक्रमाम्.............. मूर्तिं दर्शं दर्शं...... .....।"

सोऽयं शिववीरः राजनीतौ अश्वारोहणे खड्गचालने मल्लविद्यायां बाणविद्यायाञ्च अतितरां निपुण आसीत्। तदुक्तम् – "को नामापरः शिववीरात्? स एव राजनीतौ निष्णातः, स एव.......... गुणिगणगुणग्रहणाऽग्रही वर्तते।"

स्वातन्त्र्यरसिकोऽयमेव भारतीयानां सुप्तप्रायं स्वाभिमानं शौयञ्च जागरयति। स एव तेषु देशभक्तिम् आत्मविश्वासं स्वधर्मानुरागञ्च जनयति। यश्च क्वचित् शत्रूणां कपटाचरणं वीक्ष्य 'मायाचारो मायया वर्तितव्यः' इति कूटनीतिमप्यनुसरति अत एव तन्नामश्रवणादेव शत्रवो बिभ्यति। तदुक्तम् अपजलखान सैनिकैः–"अहो! विलक्षणः प्रतापः एतस्य, पवनेऽपि प्रवहति........ स एवागत इत्यभिशङ्क्यतेऽस्माभिः।" स्वदेशे स्वधर्मे च तदीयो दृढतरोऽनुरागः आसीत्। तदुक्तं तेन गौरसिंहं सम्बोधयता–"साधु, साधु, कथं न

स्यादेवम्? भारतवर्षीया यूयम्; ............. स्वाभाविक एवानुरागः सर्वस्यापि स्वदेशे......... प्राणाः यान्तु न धर्मः "इत्यार्याणां दृढः सिद्धान्तः।" एवं नायकस्य शिववीरस्य चरित्रचित्रणे कविरतितरां सफलो दृश्यते।

शिवराजस्य सहायकपात्रेषु गौरसिंहः मुख्यायते यश्च आकृत्या सुन्दरः, वर्णेन गौरः जटाभिर्ब्रह्मचारी वयसा षोडशवर्षदेशीयः कम्बुकण्ठः आयतललाटः सुबाहुः विशाललोचनश्चास्ति। एतदीयं यच्चित्रणं व्यासमहोदयेन कृतमस्ति तदनुसारमयं सुभटः राजनीतिनिपुणः योद्धॄणां धौरेयः वेषपरिवर्तन–गायनादिना गूढचरत्वे निपुणः, वाग्मी, स्वामिभक्तश्चास्ति; निजकार्यनिर्वहणे च सततं जागरुकोऽस्ति। निजशौर्येण एव अयम् अपहृतां बालिकां यवनाद् रक्षति। 'ग्रामं गच्छन् तृणं स्पृशति' इति न्यायेन शिववीरस्य साक्षात्कारात् पूर्वं महता चातुर्येण द्वारपालं परीक्षते। एवमेव मध्येमार्गं परस्परमालपतोः अपजलखानसैनिकयोः युद्धविषयिणींवार्तां शृणोति; तां च याथातथ्येन ज्ञातुं शिववीरानुमत्या गायकवेषेण अपजलखानशिविरम् उपैति; तदीयां सर्वां गूढयोजनाञ्च विज्ञाय आयाति। अयमेव प्रतिगव्यूति आश्रमाणां स्थापनया तत्र स्थितानां नानारूपधारिणां तपस्विनां माध्यमेन शत्रुसैन्यानां सूचनासंग्रहेण शिवस्य साहाय्यमाचरति। अत एव शिववीरोऽपि तस्मिन् पूर्णं विश्वसिति तच्चातुर्यं च प्रशंसति। तदुक्तम् –

"वीर! कुशलोऽसि, सर्वं करिष्यसि; जाने तव चातुरीम्................ नीतिमार्गान् वेत्सि।" वस्तुतः गौरसिंहस्य चरित्रचित्रणे कविः नितरां सफलोऽभूत्।

शिवराजविजये प्रथमे विरामे अन्यत् प्रमुखं पात्रमस्ति रघुवीरसिंहः; यश्च शिवस्य दौत्यं निर्वहति। अयं षोडशवर्षदेशीयो गौरो युवा अस्ति; यश्च कुञ्चितकचगुच्छः उन्नतांसः प्रलम्बबाहुः विनम्रः कर्त्तव्यपरायणः सुभटश्चास्ति। अयं शिववीरस्य विश्वसनीयः चरोऽस्ति। स च शिवाज्ञया सायं समये अश्वमारुह्य सिंहदुर्गात् तोरणदुर्गं प्रतिष्ठते। तदानीमेकतः सायंप्रभवोऽन्धकारः आसीत् अपरतः मेघमाला समुन्नमति, अकस्मादेव झञ्झावातः समुद्गच्छति, वृष्टिरारभते; पार्वत्यमार्गोऽपि अदृष्टचरो निम्नोन्नतश्चासीत्; पुनरपि अयं वीरः 'कार्यं साधयेम देहं वा पातयेम' इत्युक्तिं चरितार्थयन् न कर्त्तव्याद् विरमति। तदुक्तम् कविना – यावदेकस्यां दिशि नयने.......... महाशब्देन पर्यपूर्यत साऽरण्यानी। परमधुनाऽपि– "देहं वा पातयेयं कार्यं वा साधयेमम्" इति कृतप्रतिज्ञोऽसौ शिववीरचरो न निजकार्यान्निवर्तते।

प्रसङ्गेन सौवर्ण्याम् अनुरक्तोऽप्ययं निजकर्त्तव्यात् न जातु उदास्ते। सौवर्ण्या अनुमतोऽप्ययं तस्याः कण्ठे मालां परिधापयति; परं न किञ्चिदपि तदङ्गानि स्पृशति। एवमेतदीयं चरित्रमतीवोत्कृष्टं प्रतिभाति।

शिवराजविजये प्रथमे विरामे एकमेव स्त्रीपात्रमस्ति–सौवर्णी। तस्याश्चरित्रचित्रणं कविना एकस्याः कुलीनायाः भारतीय कन्यायाः प्रतिनिधिरूपेण कृतमस्ति। सा सुवर्णवर्णा मधुरकण्ठा, श्यामलकेशवती खञ्जनमञ्जुनयना इन्दुवदना मधुरस्मितवती एकादशवर्षदेशीया चास्ति। बाल्य एवास्याः पितरौ दिवं प्राप्नुतः; ताञ्च तत्परिवारस्य पुरोहितः देवशर्मा एव पालयति स्म। तदाज्ञया असौ रघुवीरसिंहाय मोदकं प्रयच्छति; तत्कण्ठे च मालिकां परिधापयति; तदानीं तस्याः सङ्कोचः तदाचरणञ्च कुलीनतां प्रकटयति तदुक्तम्– "सा चावलोक्य तमेव पूर्वावलोकितं युवानम्, व्रीडाभारमन्थरापि ताताज्ञया बलादिव प्रेरिता ग्रीवां नमयन्ती........... निववृते।" शिवराजविजये प्रथमे विरामे यवनसेनापतेः अपजलखानस्य प्रतिनायकत्वेन चित्रणं कृतमस्ति। एतदीयं चित्रणमपि सर्वतोभावेन यथार्थमाश्रयते। अयमतीव व्यसनी अदूरदर्शी आत्मश्लाघारतश्चास्ति। मदोन्मत्तोऽयं गोप्यमपि वृत्तजातं प्रकटरूपेण प्रकटयति। तदुक्तं तेन– "गोपीनाथद्वाराऽऽहूतो ............... यद्यप्येवं स्पष्टमुदीरणं राजनीतिविरुद्धम्, तथाऽपि मदावेशस्तु न प्रतीक्षते विवेकम्।"

तदीयां व्यसनासक्तिं वीक्ष्य तदीयाः सैनिकाः विषीदन्ति। तदुक्तम् – "शिवप्रतापञ्च विदन्नपि" अद्य नृत्यम्, अद्य गानम्, अद्य लास्यम्, अद्य मद्यम्, अद्य वाराङ्गना, अद्य भ्रूंकुसकः अद्य वीणावादनम्" इति

स्वच्छन्दैरुच्छृङ्खलाऽऽचरणै र्दिनानि गमयति।"

स्वकीयेन अमर्यादितेन आचरणेन अदूरदर्शित्वेन चायं मृत्युं प्राप्नोति।

एवञ्च पात्रान्तरणां चित्रणेऽपि कविवरो व्यासः अतीव सफलो दृश्यते। सर्वत्रैवायं सहजतां किं वा स्वाभाविकामाश्रयते।

**संवादयोजना–**काव्येषु यथावसरं संवादयोजनायाः अपि महत्त्वपूर्णं स्थानं भवति; कालिदासादीनां कवीनां काव्येषु बहुत्र रुचिरा संवाद–योजना दरीदृश्यते। शिवराजविजयस्तु एकः उपन्यासो विद्यते संवादयोजना प्रमुखं तत्त्वमस्ति। शिवराजविजये ब्रह्मचारिगुरु–योगिराजयोः गौरसिंह–द्वारपालयोः तानरङ्ग–अपजलखानयोः गोपीनाथ–शिवराजयोः रघुवीरसिंह–तोरणदुर्गाध्यक्षयोः मध्ये रुचिराः संवादाः जायन्ते। तत्र गौरसिंहद्वारपालयोः संवादो यथा – संन्यासी–कथमस्मान् संन्यासिनोऽपि कठोरभाषणैस्तिरस्करोषि?

दौवारिकः – भगवन्! भवान् संन्यासी तुरीयाश्रमसेवीति प्रणम्यते; परन्तु प्रभूणामाज्ञामुल्लङ्घ्य निजपरिचयमददेवायातीत्याक्रुश्यते।"

संन्यासी – सत्यं क्षान्तोऽयमपराधः ............ प्रवेष्टव्याः। दौवारिकः – संन्यासिन्। संन्यासिन्। बहूक्तम्, विरम, न वयं दौवारिका ब्रह्मणोऽप्याज्ञां प्रतीक्षामहे। ............. महाराज–शिववीरस्याऽऽज्ञां वयं शिरसा वहामः।

एवं शिवराजविजये संवादात्मिकता अतीव प्रशस्या अस्ति।

**रसयोजना–** आनन्दप्राप्तिस्तावत् काव्यस्य परमं प्रयोजनमस्ति; काव्याज्जायमानोऽयमेवानन्दः रससंज्ञयोच्यते। तत्सत्त्वे एव काव्यस्य काव्यमित्यभिधा संगच्छते। अत एवोच्यते – **वाक्यं रसात्मकं काव्यमिति।** कविवरः अम्बिकादत्त– व्यासोऽपि रसयोजनायामतीव सफलो दृश्यते। एतदीये शिवराजविजये वीरः प्रधानो रसोऽस्ति; अन्ये शृंगारादयो रसाश्चात्र अङ्गभूताः सन्ति। वीररसानुकूला एतदीया भाषा क्वचिद् ओजस्विनी गाढबन्धा चास्ति चेदपरत्र माधुर्यगुणोपेता अल्पसमासा असमासा वा अस्ति।

तत्र शिववीरस्य शौर्याभिव्यञ्जने ओजस्विनी सप्रसादा रचना यथा – **"को नामापरः शिववीरात्? स एव राजनीतौ निष्णातः, स एव सैन्धवारोहणविद्या– सिन्धुः, स एव चन्द्रहासचालने चतुरः................ स एव स्वधर्मरक्षणसक्षणः।"** .................. कथं वा 'आगत एष शिववीरः' – **इति भ्रमेणापि सम्भाव्य अस्य विरोधिषु केचन मूर्च्छिताः निपतन्ति .................. प्रणिपातपरम्परां रचयन्तो जीवनं याचन्ते।"** यथा वा गौरसिंह–कन्यापहारकयुवकयोः संवादे उत्साहाभिव्यञ्जना –

गौरसिंहः – (सक्रोधं विहस्य) **वयमपि स्वाङ्कागतसत्त्ववृत्तयः शिवस्य गणाः अत्रैव निवसामः।** तत्सुप्रभातमद्य स्वयमेव त्वं दीर्घदावदहने पतङ्गायितोऽसि।

यथा वा वातवर्षादिकमुपेक्ष्य सत्वरं गच्छतः रघुवीरसिंहस्य वर्णने – **'पदे पदे दोधूयमाना वृक्षशाखाः सम्मुखमाहनन्ति परं दृढसंकल्पोऽयं सादी न स्वकार्याद्** विरमति।' एवमत्र वीररसस्य स्फुटमभिव्यक्तिर्दृश्यते।

रसान्तराणां वर्णनावसरे करुणस्य अभिव्यञ्जना यथा – **वृद्धोऽपि च एकं करं तत्पृष्ठे विन्यस्य, अन्येन च तस्याः शिरः परिमृशन् "कोसले! कानि पातकानि पूर्वजन्मनि कृतवत्यसि? यद् बाल्य एव त्वत्पिता सङ्ग्रामे म्लेच्छहतकै– धर्मराजनगराध्वन्यध्वन्यः कृतः। माता च तव** ततोऽपि पूर्वं कथावशेषा संवृत्ता.................. **सकरुणं विललाप।'** वर्णनमेतद् हठादेव सहृदयान् करुणरसनिमग्नान् करोति।

एवमेव सौवर्ण्याः वर्णनावसरे शृंगाररसाभिव्यंजना यथा – **सेयं वर्णेन सुवर्णम्, कलरवेण पुंस्कोकिलान् केशैः रोलम्बकदम्बानि ललाटेन कलाधरकलाम् लोचनाभ्यां खञ्जनान् अधरेण बन्धुजीवम् हासेन** ज्योत्स्नां तिरस्कुर्वती ........... मन्दमन्दम्, मुग्धमुग्धम् मधुरमधुरम् किञ्चिद् गायतीति।" माधुर्यगुणोपेता समासरहितेयं रचना शृंगाररसानुकूला वर्तते। एवमन्येषामपि रसानां सुन्दरं चित्रणमत्रास्ति।

**अलंकारयोजना–** काव्ये रसोऽलङ्कारश्चेति द्वयं चमत्कृतिजनकं भवति। आचार्याणां मते समीक्षापूर्वकं कृता अलंकारयोजना काव्यशोभायै सम्पद्यते। तेषां मते आग्रहबुद्ध्या अलङ्काराणां विनिवेशः न कार्यः।

शिवराजविजये सर्वत्रैव अलंकाराणां स्वाभाविकः प्रयोगः दृश्यते। अत्र विशेषतः उपमारूपकोत्प्रेक्षादी–नामर्थालंकाराणां प्रयोगो दृश्यते; शब्दालंकारेषु विशेषतोऽनुप्रासच्छटा दृश्यते। तत्रानुप्रासच्छटा यथा –

**वीरता–सीमन्तिनी–सीमन्त–सुन्दर–सान्द्र–सिन्दूर–दान–देदीप्यमान–दो– र्दण्डः।**

यथा वा – **"प्राच्यपयोनिधि चुम्बनचञ्चुरायाः, रिङ्गत्तरङ्गभङ्गोद्भूतावर्त– शतभीमायाः भीमायाः।"**

यमकच्छटा यथा– "विलक्षणोऽयं भगवान् सकलकला–कलापकलनः सकलकालनः करालः कालः।"

अर्थालङ्कारेषु उपमा यथा – **"मृगीव व्याघ्राऽऽघ्राता अश्रुप्रवाहैः स्नाता" "मृणालगौरीम्" कुन्दकोराग्रदतीम् इत्यादौ। यथा वा – "दीर्घदावदहने पतङ्गायितोऽसि।"**

यथा वा – **"अङ्गारप्रतिमे नयने।"**

रूपकं यथा – **"एष भगवान् मणिराकारामण्डलस्य .......... इनश्च दिनस्य।"**

यथा वा" **'यामिनी कामिनीचन्दनबिन्दौ इव।'**

यथा वा – **"मदसिभुजङ्गिन्या ..............।"**

उत्प्रेक्षा – काव्ये कल्पनायाः किमपि विशिष्टं महत्त्वं भवति; तत्र च स्वभावतः उत्प्रेक्षायोजना भवति। शिवराजविजयेऽपि बहुत्र उत्प्रेक्षाचमत्कृतिर्दृश्यते। तथाहि–**समुदिते यामिनीकामिनी चन्दनबिन्दौ इव इन्दौ, कौमुदीकपटेन सुधाधारामिव वर्षति गगने, अस्मन्नीतिवार्तां** शुश्रूषुषु **इव मौनमाकलयत्सु पतंगकुलेषु ............।"**

एवमन्येषामपि अलंकाराणामत्र रसानुकूलं चित्रणं दृश्यते; तच्च व्याख्यायां स्फुटं भविष्यति।

**भाषा–सौष्ठवम्** – मनोगतानां भावानामभिव्यञ्जनायै भाषा प्रमुखं साधनमस्ति। अत एव भावानुकूला भाषा प्रशस्ता मन्यते। शिवराजविजयस्य भाषा सरला सहजा भावानुरूपिणी प्रभावकारिणी चास्ति। प्रसङ्गानुसारं कविना व्यासेनात्र वाक्ययोजना तदनुकूलालंकारादीनाञ्च विन्यासो विहितोऽस्ति।

यदि क्वचिद् सुदीर्घसमासा ओजस्विनी रचना अस्ति चेदपरत्र असमासा मध्यमसमासा मधुरा च रचना अस्ति। एतत् तु विशेषेण दृष्टव्यमस्ति यदयं न क्वापि भाषां विशेषणाधिक्येन भारवतीं कुरुते न अपेक्षितान् शब्दान् उपेक्षते। सर्वत्र एव भाषाभावयोः सुन्दरः समन्वयः दृश्यते। काव्येऽस्मिन् प्रायेण शौर्याभिव्यञ्जनावसरे पाञ्चालीरीत्याः प्रयोगो दृश्यते अन्यत्र च वैदर्भ्याः।

तत्र असमासा पदरचना यथा –

**"वटुरसौ आकृत्या सुन्दरः, वर्णेन गौरः जटाभिर्ब्रह्मचारी वयसा षोडशवर्षदेशीयः कम्बुकण्ठः आयतललाटः, सुबाहुर्विशाललोचनश्चासीत्।"**

अल्पसमासा पदरचना यथा –

**एष भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचरचक्रस्य, कुण्डलमा– खण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य, प्रेयान् पुण्डरीकपटलस्य ............... इनश्च दिनस्य।"**

सुदीर्घसमासा पदावली यथा – **"सद्यश्छिन्नपरिपन्थिगलगलच्छोणित– च्छुरितच्छन्नच्छुरिकैः भयोद्भेदनभिन्दिपालैः स्वप्रतिकूल–कूलोन्मूलनानुकूलव्यापार– व्यासक्त शूलैः........... प्रचण्डदोर्दण्डवैदग्ध यभाण्डकाण्डप्रकाडैः .......... राजपुत्रदेशः।"**

एवमन्यत्र द्रष्टव्यमस्ति। इत्थं समीक्षादृष्ट्या "शिवराजविजयः" एकमुत्कृष्टं गद्यकाव्यमस्ति।